M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 373

Title: Vedanta Sara

373

:		Vedānta Sāra	: **Title**
:	:	Sadānanda	: Author
:	:		: Editor
:	:		: Year, Vols.
:	:		: Publisher
373 :	:		: Remarks

वे.
१

श्रीगणेशाय नमः॥ अखंडं सच्चिदानंदमवाङ्मनसगोचरं आत्मानमखिलाधारमाश्रयेभीष्टसिद्धये १ अर्थतोप्यद्व
यानंदानतीतद्वैतभावनः गुरूनाराध्य वेदांतसारं वक्ष्ये यथामति २ वेदांतो नामोपनिषत्प्रमाणं तदुपकारीणि शारीरकसू
त्रादीनि च अस्य वेदांतप्रकरणत्वात् तदीयैरेवानुबंधैस्तद्वत्तासिद्धेर्न ते पृथगालोचनीयाः तत्रानुबंधो नाम अधिकारिविष
यसंबंधप्रयोजनानि अधिकारी तु विधिवदधीतवेदवेदांगत्वेनापाततोऽधिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मांतरे
वा काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितांतनिर्मलस्वांतः
साधनचतुष्टयसंपन्नः प्रमाता। काम्यानि स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि च निषिद्धानि नरकाद्यनिष्टसाधनानि ब्र
ह्महननादीनि नित्यानि अकरणे प्रत्यवायसाधनानि संध्यावंदनादीनि नैमित्तिकानि पुत्रजन्माद्यनुबंधीनि जातेष्ट्यादीनि प्रा
यश्चित्तानि पापक्षयसाधनानि चांद्रायणादीनि उपासनानि सगुणब्रह्मविषयमानसव्यापाररूपाणि शांडिल्य २
विद्यादीनि एतेषां नित्यादीनां चित्तशुद्धिः परं प्रयोजनं उपासनानां तु तदैकाग्र्यं विविदिषंति यज्ञेनेत्यादिश्रुतेः तपसा कल्मषं ह
न्तीत्यादिस्मृतेश्च नित्यनैमित्तिकयोरुपासनानां चावांतरफलं पितृलोकसत्यलोकप्राप्ती कर्मणा पितृलोको विद्यया देवलो

कइति श्रुतेः॥ साधनानि नित्यानित्यवस्तुविवेकेहामुत्रार्थफलभोगविरागशमादिषट्कसंपन्मुमुक्षुत्वानि नित्यानित्यव
स्तुविवेकस्तावत् ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यमिति विवेचनं॥ ऐहिकानां स्रक्चंदनादिविषयभोगानां कर्मजन्य
तयानित्यत्ववत्। आमुष्मिकाणामपि अमृतादिविषयभोगानां अनित्यतया तेभ्यो नितरां विरतिरिहामुत्रार्थफलभोगवि
रागः शमादयस्तु शमदमोपरतितितिक्षासमाधानश्रद्धाः शमस्तावत् श्रवणादिव्यतिरिक्तविषयेभ्यो मनसो नि
ग्रहः दमो बाह्येंद्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनं निवर्तितानां तेषां तद्व्यतिरिक्तविषयेभ्य उपरमणमुपरतिः॥
अथवा विहितानां कर्मणां विधिना परित्यागः। तितिक्षा शीतोष्णादिद्वंद्वसहिष्णुता निगृहीतस्य मनसः श्रवणादौ तदनुगुणवि
षये च समाधानं समाधिः गुरूक्तवेदांतवाक्येषु विश्वासः श्रद्धा मुमुक्षुत्वं मोक्षेच्छावत्त्वं एवंभूतः प्रमाताधिकारी शांतो दांत इत्यादि
श्रुतेः उक्तं च प्रशांतचित्ताय जितेंद्रियाय प्रहीणदोषाय यथोक्तकारिणे गुणान्विताय अनुगताय सर्वदा प्रदेयमेतत् सततं मु
मुक्षवे इति विषयो जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयं तत्रैव वेदांतानां तात्पर्यात् संबंधस्तु तदैक्यप्रमेयस्य तत्प्रतिपादकोपनिष
त्प्रमाणस्य च बोध्यबोधकभावलक्षणः प्रयोजनं तु तदैक्यप्रमेयगताज्ञाननिवृत्तिः स्वस्वरूपानंदावाप्तिश्च तरति शोकमा

वे.स. स्मवित्ब्रह्मविद्ब्रह्मैव भवतीत्यादिश्रुतेः अयमधिकारीजननमरणादिसंसारानळसंतप्तः प्रदीप्तशिराजळराशिमिवोपहारपाणि
२ ःश्रोत्रियंब्रह्मनिष्ठंगुरुमुपसृत्यतमनुसरति समित्पाणिःश्रोत्रियमित्यादिश्रुतेश्च सपरमकृपयाऽध्यारोपाऽपवादन्या
येनैनमुपदिशति तस्मैसविद्वानुपसन्नायप्राहेत्यादिश्रुतेः असर्पभूतायांरज्जौसर्पारोपवद्वस्तुनि अवस्त्वारोपोऽध्यारोपः
वस्तुसच्चिदानंदानंताद्वयंब्रह्म अज्ञानादिसकलजडसमूहोऽवस्तु अज्ञानंतुसदसद्भ्यामनिर्वचनीयंत्रिगुणात्मकंज्ञान
विरोधिभावरूपंयत्किंचिदितिवदंति अहमज्ञइत्यनुभवात् देवात्मशक्तिंस्वगुणैर्निगूढामित्यादिश्रुतेश्च इदमज्ञा
नंव्यष्टिसमष्ट्यभिप्रायेणैकमनेकमितिव्यवह्रियते तथाहि यथावृक्षाणांसमष्ट्यभिप्रायेणवनमित्येकत्वव्यपदे
शः यथावाजलानांसमष्ट्यभिप्रायेणजलाशयइति तथानानात्वेनप्रतिभासमानानांजीवगतानामज्ञानानांसमष्ट्य
भिप्रायेणतदेकत्वव्यपदेशः अजामेकामित्यादिश्रुतेः इयंसमष्टिरुत्कृष्टोपाधितयाविशुद्धसत्त्वप्रधाना एतदुपहितं २
चैतन्यंसर्वज्ञत्वसर्वेश्वरत्वसर्वनियंतृत्वादिगुणकमव्यक्तमंतर्यामीजगत्कारणमीश्वरइतिचव्यपदिश्यते सकला
ज्ञानावभासकत्वात् यःसर्वज्ञःसर्वविदित्यादिश्रुतेः अस्येयंसमष्टिरखिलकारणत्वात् कारणशरीरमानंदप्रचुर

त्वात्कोशवदाच्छादकत्वाच्चानंदमयकोशः सर्वोपरमत्वात्सुषुप्तिः अतएवस्थूलसूक्ष्मप्रपंचलयस्थानमितिचोच्यते यथावनस्यव्यष्ट्य
भिप्रायेणवृक्षाइत्यनेकत्वव्यपदेशः यथावाजलाशयस्यव्यष्ट्यभिप्रायेणजलानीति तथाज्ञानस्यव्यष्ट्यभिप्रायेणतदनेकत्व
व्यपदेशः यथाव्यष्ट्यभिप्रायेणजीवगताऽज्ञानस्यनानात्वव्यपदेशः इंद्रोमायाभिःपुरुरूपईयतेइत्यादिश्रुतेः अस्यव्यस्तसमस्त
व्यापित्वेनव्यष्टिसमष्टिताव्यपदेशः इयंव्यष्टिर्निकृष्टोपाधितयामलिनसत्वप्रधाना एतदुपहितंचैतन्यमल्पज्ञत्वानीश्वरत्वादिगु
णकंप्राज्ञइत्युच्यते एकाज्ञानावभासकत्वात् अस्यप्राज्ञत्वमस्पष्टोपाधितयाऽनतिप्रकाशकत्वात् अस्यापीयमहंकारादिकारणत्वा
त्कारणत्वात्कारणशरीरमानंदप्रचुरत्वात् कोशवदाच्छादकत्वाच्चानंदमयकोशः सर्वोपरमत्वात्सुषुप्तिः अतएवस्थूलसूक्ष्म
शरीरलयस्थानमितिचोच्यते तदानीमेतावीश्वरप्राज्ञौ चैतन्यप्रदीप्ताभिरतिसूक्ष्माभिरज्ञानवृत्तिभिरानंदमनुभवतः आनंद
भुक्चेतोमुखःप्राज्ञइत्यादिश्रुतेः सुखमहमस्वाप्सं नकिंचिदवेदिषमित्युत्थितस्यपरामर्शोपपत्तेश्च अयमनयोर्व्यष्टिस
मष्ट्योर्वनवृक्षयोरिवजलाशयजलयोरिवाभेदः एतदुपहितयोरीश्वरप्राज्ञयोरपिवनवृक्षावच्छिन्नाकाशयोरिवजला
शयजलगतप्रतिबिंबाकाशयोर्वाऽधारानुपहिताकाशवदनयोरज्ञानतदुपहितचैतन्ययोराधारभूतंयदुपहितचैतन्यं

रिवाभेदः। वनवृक्षतदवच्छिन्नाकाशयोर्जलाशयजलगतप्रतिबिंबाकाशयो तु

वेसा तत्तुरीयमित्युच्यते शिवं शांतमद्वैतं चतुर्थं मन्यंते इत्यादिश्रुतेः इदमेव तुरीयं शुद्धचैतन्यमज्ञानादितदुपहितचैतन्याभ्यां
२ तप्तायःपिंडवदविविक्तं सन् महावाक्यस्य वाच्यं विविक्तं सल्लक्ष्यमिति चोच्यते अस्याज्ञानस्यावरणविक्षेपनामकमस्ति
शक्तिद्वयं आवरणशक्तिस्तावदल्पोपि मेघोऽनेकयोजनायतमादित्यमंडलमालोकयितृनयनपथपिधायकतया यथा
आच्छादयतीव तथाज्ञानं परिच्छिन्नमप्यात्मानमपरिच्छिन्नमसंसारिणमवलोकयितृबुद्धिपिधायकतया आच्छादयति
तादृशं सामर्थ्यं तदुक्तं घनछन्नदृष्टिर्घनछन्नमर्कं यथा निःप्रभं मन्यते चातिमूढः तथा बद्धवद्भाति यो मूढदृष्टेः स नित्यो
पलब्धिस्वरूपोहमात्मा अनयावृतस्यात्मनः कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वादिसंसारभावना अपि संभवति यथास्वा
ज्ञानेनावृतायां रज्ज्वां सर्पत्वसंभावना विक्षेपशक्तिस्तु यथा रज्ज्वज्ञानं स्वावृतरज्जौ स्वशक्त्या सर्पादिकमुद्भावयति एवमप्य
ज्ञानं स्वावृतात्मनि स्वशक्त्या आदिकमुद्भा आकाशादिप्रपंचमुद्भावयति तादृशं सामर्थ्यं तदुक्तं विक्षेपशक्तिर्लिंगादिब्रह्मांडां
तं जगत्सृजेदिति शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वप्रधानतया निमित्तं स्वोपाधिप्रधानतयोपादानं च भवति यथा लूता तं २
तुकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीरप्रधानतयोपादानं च भवति तत्र तमःप्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्या

क दाकाशाद्वायुः वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी चोत्पद्यते तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादिश्रुतेः
तेषु जाड्याधिक्यदर्शनात्तमःप्राधान्यं तत्कारणस्य तदानीं सत्वरजस्तमांसि कारणगुणप्रक्रमेण तेष्वाकाशादिषु
त्पद्यंते एतान्येव सूक्ष्मभूतानि तन्मात्राणि अपंचीकृतानि चोच्यंते एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्प
द्यंते सूक्ष्मशरीराणि सप्तदशावयवानि लिंगशरीराणि अवयवास्तु ज्ञानेंद्रियपंचकं बुद्धिमनसी कर्मेंद्रियपंचकं वायुपंचकं
चेति ज्ञानेंद्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि एतान्याकाशादीनां सात्विकांशेभ्यो व्यस्तेभ्यः पृथक्क्रमेणो
त्पद्यंते बुद्धिर्नाम निश्चयात्मिकांतःकरणवृत्तिः मनो नाम संकल्पविकल्पात्मिकांतःकरणवृत्तिः अनयोरेव चित्ताहंकारयोरंतर्भावः श्री
एते पुनराकाशादिगतसात्विकांशेभ्यो मीलितेभ्य उत्पद्यंते एतेषां प्रकाशात्मकत्वात्सात्विकांशकार्यत्वं इयं बुद्धिर्ज्ञानेंद्रि
यैः सहिता सती विज्ञानमयः कोशो भवति अयं कर्तृत्वभोक्तृत्वाद्यभिमानत्वेन इहलोकपरलोकगामी व्यावहारिको जीव इत्युच्य
ते मनस्तु कर्मेंद्रियैः सहितं सन् मनोमयः कोशो भवति कर्मेंद्रियाणि वाक्पाणिपादपायूपस्थाख्यानि एतानि पुनराका
शादीनां रजोंशेभ्यो व्यस्तेभ्यः पृथक्क्रमेणोत्पद्यंते आकाशाच्छ्रोत्रपादौ वायोस्त्वक्पाणी तेजसश्चक्षुर्वाचौ अद्भ्यो

वे॰सा॰ जिह्वोपस्थौ पृथिव्याघ्राणवाग्वेंद्रिये वायवः प्राणापानव्यानोदानसमानाः प्राणोनामप्राग्गमनवान् नासादिस्थानवर्ती अ
पानोनामअवाग्गमनवान् पाय्वादिस्थानवर्ती व्यानोनामविष्वग्गमनवान् अखिलशरीरवर्ती उदानोनामकंठस्थानीयः ऊर्ध्वगम
५ नवान् उत्क्रमणवायुः समानः शरीरमध्यगोऽशीतपीतान्नादिसमीकरणकरः केचित्तु नागकूर्मकृकरदेवदत्तधनंजया
ख्याः पंचान्येवायवः संतीतिवदंति नागउद्गीरणकरः कूर्मउन्मीलनकरः कृकरः क्षुत्करः देवदत्तोजृंभणकरः धनंजयःपो
षणकरः एतेषांप्राणादिष्वंतर्भावात्प्राणादयः पंचैवेतिकेचित् एतत्प्राणादिपंचकं आकाशादिगतरजोंशेभ्योमीलितेभ्यउत्प
द्यते इदंप्राणादिपंचकंकर्मेंद्रियैः सहितंसत्प्राणमयःकोशोभवति अस्यक्रियात्मकत्वेनरजोंशकार्यत्वं एतेषुकोशेषुमध्येविज्ञा
नमयोज्ञानशक्तिमान्कर्तृरूपः मनोमयइच्छाशक्तिमान्करणरूपः प्राणमयःक्रियाशक्तिमान्कार्यरूपः योग्यत्वादेवमेतेषां
विभागइतिवर्णयंति एतत्कोशत्रयंमीलितंसत्सूक्ष्मशरीरमित्युच्यते अत्राप्यखिलसूक्ष्मशरीरमेकबुद्धिविषयतयावनवज्ज ४
लाशयवद्वासमष्टिः अनेकबुद्धिविषयतयावृक्षवज्जलवद्वाव्यष्टिरपिभवति एतत्समष्ट्युपहितंचैतन्यंसूत्रात्माहिरण्यगर्भःप्रा
णश्चोच्यते सर्वत्रानुस्यूतत्वात् ज्ञानक्रियाशक्तिमदुपहितत्वाच्च अस्यैवेयंसमष्टिः स्थूलप्रपंचापेक्षयासूक्ष्मत्वात्सूक्ष्मशरी
रंविज्ञानमयादिकोशत्रयंजाग्रद्वासनामयत्वात्स्वप्नः अतएवस्थूलप्रपंचलयस्थानमितिचोच्यते एतद्व्यष्ट्युपहितचैतन्यं

तैजसोभवतितेजोमयांतःकरणोपहितत्वात् अस्यापीयंव्यष्टिःस्थूलशरीरापेक्षयासूक्ष्मत्वादितिहेतोरेवसूक्ष्म
शरीरंविज्ञानमयादिकोशत्रयंजाग्रद्वासनामयत्वात्स्वप्नः अतएवस्थूलशरीरलयस्थानमितिचोच्यते एतौ
सूत्रात्मतैजसौतदानीमनोवृत्तिभिः सूक्ष्मविषयाननुभवतः प्रविविक्तभुक्तैजसइत्यादिश्रुतेः प्रविविक्तंसूक्ष्मंतद्भु
क्इतिप्रविविक्तभुक् तैजसः तेजोंतःकरणकार्यादिभावेनपरिणतंतदेवसूक्ष्मशरीरादिहीनंयस्यतैजसोंतःकरणस्वा
मी अत्रापिव्यष्टिसमष्ट्योस्तदुपहितसूत्रात्मतैजसयोः वनवृक्षवत्तदवच्छिन्नाकाशवच्चजलाशयजलवत्तद्गतप्रतिबिंबा
काशवच्चाभेदः एवंसूक्ष्मशरीरोत्पत्तिः स्थूलभूतानितुपंचीकृतानिपंचीकरणंतुआकाशादिपंचकस्यैकैकंद्विधासमंविभ
ज्यतेषुदशसुभागेषुप्राथमिकान्पंचभागान्प्रत्येकंचतुर्धासमंविभज्यतेषुचतुर्षुचतुर्णांभागानांस्वस्वद्वितीयभा
गपरित्यागेनभागांतरेषुसंयोजनंपंचीकरणं अस्याप्रामाण्यंनाशंकनीयंत्रिवृत्करणादितिश्रुतेः पंचीकरण
स्याप्युपलक्षणत्वात् तत्पंचानांपंचात्मकत्वेसमानेपिविशेषात्तद्वादस्तद्वादइतिन्यायेनआकाशादिव्यपदेशः

वेदांतसा. भेदः संभवति तदानीमाकाशे शब्दोभिव्यज्यते वायौ शब्दस्पर्शौ अग्नौ शब्दस्पर्शरूपाणि अप्सु शब्दस्पर्शरूपर
५ साः पृथिव्यां शब्दस्पर्शरूपरसगंधाश्च एतेभ्यः पंचीकृतेभ्यः भूर्भुवस्वर्महर्जनस्तपः सत्यमित्येतन्नामका
नामुपर्युपरि विद्यमानानामतलवितलसुतलरसातलतलातलमहातलपातालनामकानामधोधो विद्य
मानानां लोकानां ब्रह्मांडस्य चतुर्विधस्थूलशरीराणामन्नपानादीनां चोत्पत्तिर्भवति शरीराणि तु जरायुजां
डजस्वेदजोद्भिज्जाख्यानि जरायुजानि जरायुभ्यो जातानि मनुष्यपश्वादीनि अंडजादीनि अंडेभ्यो जातानि प
क्षिपन्नगादीनि स्वेदजानि स्वेदाज्जातानि यूकमशकादीनि उद्भिज्जानि भूमिमुद्भिद्य जातानि क्षुपवृक्षादीनि
अत्रापि चतुर्विधस्थूलशरीरमेकानेकबुद्धिविषयतया वनवज्जलाशयवद्वा समष्टिः वृक्षवज्जलवद्वा व्यष्टिरपि भव
ति एतत्समष्ट्युपहितं चैतन्यं वैश्वानरो विराडिति चोच्यते सर्वनराभिमानित्वाद्विविधं राजमानत्वाच्च अस्यैषा स्थू
लशरीरमन्नविकारत्वादन्नमयः कोशः स्थूलभोगायतनत्वाज्जाग्रच्चेति व्यपदिश्यते एतद्व्यष्ट्युपहितं चैतन्यं विश्व इ ५

इत्युच्यते सूक्ष्मशरीराभिमानमपरित्यज्य स्थूलशरीरादिषु प्रविष्टत्वात् विश्वप्रवेशने विषुव्याप्ताविति च स्मरणात् अस्याप्येषा स्थूल
शरीरमन्नविकारत्वादेव हेतोरन्नमयः कोशो जाग्रदिति चोच्यते तदानीमेतौ विश्ववैश्वानरौ दिग्वातार्कवरुणाश्विभिः क्रमान्नि
यंत्रितेन श्रोत्रादींद्रियपंचकेन क्रमाच्छब्दस्पर्शरूपरसगंधानग्नींद्रोपेंद्रयमप्रजापतिभिः क्रमान्नियंत्रितेन पाय्वादींद्रियपंचके
न क्रमान्नंदाश्चंद्रचतुर्मुखशंकराच्युतैः क्रमान्नियंत्रितेन मनोबुध्यहंकारचित्ताख्येनांतरिंद्रियचतुष्केण क्रमात्संकल्पनिश्च
याहंकार्यचित्तांश्च सर्वानेतान्स्थूलविषयाननुभवतः जागरितस्थानो बहिःप्रज्ञ इत्यादिश्रुतेः अत्राप्यनयोः स्थूलव्यष्टि
समष्ट्योस्तदुपहितयोर्विश्ववैश्वानरयोश्च वनवृक्षवत्तदवछिन्नाकाशवच्च जलाशयजलवत्तद्गतप्रतिबिंबाकाशवच्च पूर्व
वदभेदः एवं पंचीकृतभूतेभ्यः स्थूलप्रपंचोत्पत्तिः एवं स्थूलसूक्ष्मकारणप्रपंचानामपि समष्टिरेको महान्प्रपंचो भवति यथावा
अंतरवनानां समष्टिरेकं महद्वनं यथावा अंतरजलाशयानां समष्टिरेको महान्जलाशयः एतदुपहितवैश्वानरादीश्वरप
र्यंतं चैतन्यमपि अवांतरवनावछिन्नाकाशवन्महावनावछिन्नाकाशवदवांतरजलाशयगतप्रतिबिंबाकाशवन्महाजलाश
यगतप्रतिबिंबाकाशवच्चैकमेव आभ्यां महाप्रपंचतदुपहितचैतन्याभ्यां तप्तायःपिंडवदविविक्तं सदुपहितचैतन्यं सर्वं ब्रह्मेति
वाक्यस्य वाच्यं भवति विविक्तं सल्लक्ष्यमपि भवति एवं वस्तुन्यवस्त्वारोपः सामान्येन प्रदर्शितः इदानीं प्रत्यगात्मनि इदमि

वे.सा. दमयमारोपयतीति विशेषउच्यते अतिप्राकृतस्तु आत्मावैपुत्रनामासीत्यादिश्रुतेः स्वस्मिन्निव पुत्रे प्रियत्वदर्शनात् पुत्रे पुष्टेनष्टेच
अहमेवपुष्टः अहमेवनष्टश्चेत्यनुभवात्पुत्रआत्मेतिवदति चार्वाकस्तु सवाएषपुरुषोन्नमयइत्यादिश्रुतेः प्रदीप्तगृहात्स्वपुत्रंपरित्य
६ ज्यापिस्वस्यनिर्गमदर्शनात् स्थूलोहं कृशोहं इत्याद्यनुभवाच्च स्थूलशरीरमात्मेतिवदति अपरश्चार्वाकस्तेहप्राणाः प्रजापतिमस्यब्रूयुः
इत्यादिश्रुतेः इंद्रियाणामभावेशरीरचलनायोगात् काणोहं बधिरोहमित्याद्यनुभवाच्चेंद्रियाण्यात्मेतिवदति अपरश्चार्वा
कोन्योंतरात्माप्राणमयइत्यादिश्रुतेः प्राणाभावेइंद्रियादिचलनायोगादहमशनवानहं पिपासावानित्याद्यनुभवाच्चप्राणआ
त्मेतिवदति अन्यस्तुचार्वाकोन्योंतरात्मामनोमयइत्यादिश्रुतेः मनसिसुप्तेप्राणादेरभावादहं संकल्पवानहं विकल्पवानित्या
द्यनुभवाच्चमनआत्मेतिवदति प्राभाकरतार्किकौ अन्योंतरात्मानंदमयइत्यादिश्रुतेः बुध्यादीनामज्ञानेलयदर्शनात् अहं
अहंत्वमज्ञानीत्याद्यनुभवाच्चाज्ञानमात्मेति वदतः भाट्टस्तु अज्ञानघनएवानंदमयइत्यादिश्रुतेः सुषुप्तौप्रकाशासद्भावा ६
न्मामहंनजानामीत्याद्यनुभवाच्चाज्ञानोपहितंचैतन्यमात्मेतिवदति अपरोबौऽसदेवेदमग्रआसीदित्यादिश्रुतेः सुषुप्तौसर्वा
भावादहंसुप्तोनासमित्युत्थितस्यस्वभावपरामर्शविषयानुभवाच्चशून्यमात्मेतिवदति एतेषांपुत्रादीनामनात्मत्वमुच्य
ते एतैरतिप्राकृतवादिभिरुक्तेषु श्रुतियुक्त्यनुभवाभासेषु पूर्वपूर्वोक्तश्रुतियुक्त्यनुभवाभासानामुत्तरोत्तरश्रुतियुक्त्य

नुभवाभासैर्बाधदर्शनात्पुत्रादीनामनात्मत्वंस्पष्टमेव किंच प्रत्यगस्थूलोऽचक्षुरप्राणोमनोकर्ता चैतन्यंचिन्मात्रंसत् इत्यादिप्रबल
श्रुतिविरोधादस्यपुत्रादिशून्यपर्यंतस्यजडस्यचैतन्यभास्यत्वेनघटादिवदनित्यत्वादहंब्रह्मेतिविद्वदनुभवप्राबल्याच्चतच्छ्रुतियुक्त्यनुभवाभासा
नांबाधितत्वादपिपुत्रादिशून्यपर्यंतमखिलमनात्मैव अतस्तद्भासकं नित्यशुद्धबुद्धमुक्तसत्यस्वभावंप्रत्यक्चैतन्यमेवआत्मतत्त्वमिति
वेदांततत्त्वविदनुभवः एवमध्यारोपः अपवादोनामरज्जुविवर्त्तस्यसर्पस्यरज्जुमात्रत्ववद्वस्तुविवर्त्तस्यावस्तुनोज्ञानादेः प्रपंचस्यव
स्तुमात्रत्वं तथाहि एतद्भोगायतनंचतुर्विधस्थूलशरीरजातंभोग्यरूपान्नपानादिकमेतदाश्रयभूतभूरादिचतुर्दशभुवनान्येतदा
श्रयभूतंब्रह्मांडमेतत्सर्वेषांकारणभूतंपंचीकृतभूतमात्रंभवति एतानिशब्दादिविषयसहितानिपंचीकृतभूतान्यपिसूक्ष्मशरीरजा
तंचैतत्सर्वमेतेषांकारणभूतंपंचीकृतभूतमात्रंभवति एतानिसत्त्वादिगुणसहितान्यपंचीकृतान्युत्पत्तिव्युत्क्रमेणैतत्कारणभूता
ज्ञानोपहितचैतन्यमात्रंभवति एतदज्ञानमज्ञानोपहितचैतन्यंचेश्वरादिकमेतदाधारभूतानुपहितचैतन्यंतुरीयंब्रह्ममात्रंभवति
आभ्यामध्यारोपापवादाभ्यांतत्त्वंपदार्थशोधनमपिसिद्धंभवति तथाहि अज्ञानादिसमष्टिरेतदुपहितंसर्वज्ञत्वादिविशिष्टचै
तन्यमेतदनुपहितंचैतन्यत्रयंतप्तायःपिंडवदेकत्वेनावभासमानंतत्पदवाच्यार्थोभवति एतदुपाध्युपहिताधारमनुपहितंचैतन्यं
तत्पदलक्ष्यार्थोभवति अज्ञानादिव्यष्टिरेतदुपहितज्ञत्वादिविशिष्टचैतन्यमेतदुपहितंचैतन्यत्रयंतप्तायःपिंडवदेकत्वेनाव

वे. सा ९ भासमानं त्वंपदवाच्यार्थो भवति एतदुपाध्युपहिताधारभूतमनुपहितं प्रत्यगात्मेनेदं तुरीयं चैतन्यं त्वंपदलक्ष्यार्थो भवति अथवाक्यार्थो
वर्ण्यते इदं तत्त्वमसिवाक्यं संबंधत्रयेणाखंडार्थावबोधकं भवति संबंधत्रयं नाम पदयोः सामानाधिकरण्यं पदार्थयोर्विशेषणविशेष्यभा
वः प्रत्यगात्मपदार्थयोर्लक्ष्यलक्षणभावश्चेति तदुक्तं सामानाधिकरण्यं च विशेषणविशेष्यता लक्ष्यलक्षणसंबंधः पदार्थः प्रत्यगात्म
नामिति सामानाधिकरण्यस्तावत्यथा सोयं देवदत्त इत्यस्मिन्वाक्ये तत्कालविशिष्टदेवदत्तस्य वाचकतच्छब्दस्यैतत्कालविशिष्टदेवदत्तवा
चकायंशब्दस्य च एकस्मिन्पिंडे तात्पर्यसंबंधः तथा तत्त्वमसिवाक्ये परोक्षत्वादिविशिष्टवाचकतत्पदस्यापरोक्षत्वादिविशिष्टवाच
कत्वंपदस्य च एकस्मिंश्चैतन्ये तात्पर्यसंबंधः विशेषणविशेष्यभावसंबंधस्तु यथा तत्रैव वाक्ये सशब्दार्थतत्कालविशिष्टदेवदत्त
स्यायंशब्दार्थैतत्कालविशिष्टदेवदत्तस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः लक्ष्यलक्षणसंबंधस्तु यथा तत्र सशब्दा
यंशब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेनाऽविरुद्धदेवदत्तेन सह लक्ष्यलक्षणभावः तथात्रापि वाक्ये तत्
त्वंपदयोस्तदर्थयोर्वा विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वपरित्यागेनाविरुद्धचैतन्येन सह लक्ष्यलक्षणभावः इयमेव भागत्यागलक्षणे
त्युच्यते अस्मिन्वाक्ये नीलोत्पलमिति वाक्यवद्वाक्यार्थो न संगच्छते तत्र तु नीलपदार्थनीलगुणस्योत्पलपदार्थोत्पलद्रव्यस्य च शौक्ल्य
पटादिव्यावर्तकतया अन्योन्यविशेषणविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यस्य तदैक्यस्य वा वाक्यार्थत्वांगीकारे प्रमा

तत्पदं स्वार्थं परोक्षत्वविशिष्टं परित्यज्य जीवचैतन्यं लक्षयतु एवं त्वंपदमपि स्वार्थं किंचिज्ज्ञत्वादिविशिष्टं परित्यज्य ईश्वर
चैतन्यं वा लक्षयतु तस्माज्जहल्लक्षणास्त्वेतु न च गंगापदं स्वार्थपरित्यागेन तीरपदार्थं यथा लक्षयति

णांतरविरोधाद्वाक्यार्थः संगछते अत्र तु तदर्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वमर्थापरोक्षत्वादिविशिष्ट
चैतन्यस्य च अन्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य तदैक्य
स्य वाक्यार्थत्वांगीकारे प्रत्यक्षादिप्रमाणविरोधाद्वाक्यार्थो न संगछते अत्र गंगायां घोषः प्रतिवसतीति
वाक्यवद्वाक्यार्थो न संगछते तत्र तु गंगाघोषयोराधाराधेयभावलक्षणवाक्यार्थस्य विशेषतो विरुद्ध
त्वाद्वाक्यार्थमशेषं परित्यज्य तत्संबंधितीरलक्षणाया युक्तत्वाज्जहल्लक्षणा संगछते अत्र परोक्षापरोक्षचैत या
न्यैकत्वलक्षणस्य वाक्यार्थस्य भागमात्रे विरोधाद्भागांतरस्यापि परित्यज्य अन्यलक्षणाया अयुक्तत्वाज्जहल्लक्ष
णापि न संगछते तथा तत्पदं त्वंपदं वा स्वार्थपरित्यागेन तत्पदार्थं त्वंपदार्थं वा लक्षयतु अतः कुतो जहल्लक्षणा न सं
ये गछत इति वाच्यं तत्र तीरपदाश्रवणेन तदर्थाप्रतीतौ लक्षणया तत्प्रतीत्यपेक्षायामपि तत्त्वंपदयोः श्रूयमाण
या त्वेन तदर्थप्रतीतौ लक्षणया पुनरन्यतरपदेनान्यतरपदार्थप्रतीत्यपेक्षाया अभावात् अत्र शोणो धावतीति वाक्य
वदजहल्लक्षणापि न संभवति तत्र शोणगुणगमनलक्षणस्य वाक्यार्थस्य विरुद्धत्वात्तदपरित्यागेन तदाश्र

वे सा.

८

याश्वादिलक्षणया तद्विरोधपरिहारसंभवाद्जहल्लक्षणा संभवति अत्र तु परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वस्य वाक्यार्थ
स्य विरुद्धत्वान्न द परित्यागेन तत्संबंधिनो यस्य कस्यचिदर्थस्य लक्षितत्वेपि तद्विरोधपरिहारासंभवात् जहल्लक्षणा न संभवत्येव न
च तत्पदं त्वंपदं वा स्वार्थविरुद्धांशपरित्यागेनांशांतरसहितं तत्पदार्थं त्वंपदार्थं वा लक्षयतु अतः कथं प्रकारांतरेण भागलक्षणांगीक
रणमिति वाच्यं एकेन पदेन स्वार्थांशपदार्थांतरोभयलक्षणाया असंभवात् पदांतरेण तदर्थप्रतीतौ लक्षणया पुनस्तत्प्रतीत्यपेक्षा
भावाच्च तस्माद्यथा सोयं देवदत्त इति वाक्यं तदर्थो वा तत्कालैतत्कालविशिष्टदेवदत्तलक्षणस्य वाक्यार्थस्यांशे विरोधाद्विरु
द्धं तत्कालैतत्कालविशिष्टत्वांशं परित्यज्याविरुद्धं देवदत्तांशमात्रं लक्षयति तथा तत्त्वमसि वाक्यं तदर्थो वा परोक्षत्वापरो
क्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाक्यार्थस्यांशे विरोधाद्विरुद्धं परोक्षत्वापरोक्षत्वादिविशिष्टत्वांशं परित्यज्याविरुद्धम
खंडचैतन्यमात्रं लक्षयतीति अथाधुनाहं ब्रह्मास्मीत्यनुभववाक्यार्थो वर्ण्यते एवमाचार्येणाध्यारोपापवादपुरःसरं तत्त्व
पदार्थौ शोधयित्वा वाक्येनाखंडार्थेऽवबोधितेधिकारिणोहं नित्यशुद्धबुद्धमुक्तसत्यस्वभावपरमानंदानंताद्वयं ब्रह्मास्मी ८
त्यखंडाकाराकारिता चित्तवृत्तिरुदेति सा तु चित्प्रतिबिंबिता सती प्रत्यगभिन्नमज्ञातं परं ब्रह्म विषयिणी तद्गताज्ञानमेव बा
धते तदा पटकारणतंतुदाहे पटदाहवत् अखिलकारणेज्ञाने बाधिते सति तत्कार्यस्याखिलस्य बाधितत्वात्तदंतर्भूता

खंडाकाराकारिता चित्तवृत्तिरपि बाधिता भवति तत्र प्रतिबिंबितं चैतन्यमपि यथा दीपप्रभादित्यप्रभावभासनासमर्था सती तयाभि
भूता भवति तथा स्वयंप्रकाशप्रत्यगभिन्नपरब्रह्मावभासनानर्हतया तेनाभिभूतं सत् स्वोपाधिभूताखंडवृत्तेर्बाधितत्वात् दर्प
णाभावे मुखप्रतिबिंबस्य मुखमात्रत्ववत् प्रत्यगभिन्नपरब्रह्ममात्रं भवति एवं च सति मनसैवानुद्रष्टव्यं यन्मनसा न मनुत इत्यन
योरविरोधः वृत्तिव्याप्यत्वांगीकारेण फलव्याप्यत्वप्रतिषेधप्रतिपादनात् तदुक्तं फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवा
रितं ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षितेति स्वयंप्रकाशमानत्वान्नाभास उपयुज्यते इति जडपदार्थाकाराकारितचित्त
वृत्तेर्विशेषोस्ति तथाहि अयं घट इति घटाकाराकारितचित्तवृत्तिरज्ञातं घटं विषयीकृत्य तद्गताज्ञाननिरसनपुरःसरं स्व
गतचिदाभासेन जडं घटमपि भासयति यथा दीपप्रभामंडलमंधकारगतं घटपटादिकं विषयीकृत्य तद्गतांधकारनि
रसनपुरःसरं स्वप्रभया तदपि भासयतीति एवंभूतस्वस्वरूपस्य चैतन्यस्य साक्षात्कारपर्यंतं श्रवणमनननिदिध्यास
नसमाध्यनुष्ठानस्यापेक्षितत्वात्तेपि प्रदर्श्यंते श्रवणं नाम षड्विधलिंगैरशेषवेदांतानामद्वितीयवस्तुनि तात्पर्यावधार
णं लिंगानि तु उपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादोपपत्त्याख्यानि प्रकरणप्रतिपाद्यस्य तदाद्यंतयोरुपपादन
मुपक्रमोपसंहारौ यथा छांदोग्ये षष्ठप्रपाठके प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुन एकमेवाद्वितीयमित्यादौ एतदात्म्य

 मिसंतेच प्रतिपादनं प्रकरणप्रतिपाद्यस्य तन्मध्ये पौनःपुन्येन प्रतिपादनमभ्यासः यथा तत्रैवाद्वितीयवस्तुनो मध्ये तत्त्वमसीति नवकृत्वः प्रति
पादनं प्रकरणप्रतिपाद्यस्य प्रमाणांतराविषयीकरणं अपूर्वत्वं यथा तत्रैवाद्वितीयवस्तुनो मानांतराविषयीकरणं फलं तु प्रकरणप्रतिपा
 द्यात्मज्ञानस्य तदनुष्ठानस्य वा तत्र तत्र श्रूयमाणं प्रयोजनं यथा तत्राचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इ
ति अद्वितीयवस्तुसाधनस्य तत्प्राप्तिः प्रयोजनं श्रूयते प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनमर्थवादः यथा तत्रैव उत तमादेशमप्राक्ष्यो ये
ना श्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति अद्वितीयवस्तुप्रशंसनं प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूय
माणा युक्तिरुपपत्तिः यथा तत्र यथा सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिके
त्येव सत्यमित्यद्वितीयवस्तुसाधने विकारस्य वाचारंभणमात्रत्वे युक्तिः श्रूयते मननं तु श्रुतस्याद्वितीयवस्तुनो वे
दांतानुगुणयुक्तिभिः अनवरतमनुचिंतनं विजातीयदेहादिप्रत्ययरहिताद्वितीयवस्तुसजातीयप्रत्ययप्रवाहो नि
दिध्यासनं समाधिर्द्विविधः सविकल्पको निर्विकल्पकश्चेति तत्र सविकल्पको नाम ज्ञातृज्ञानादिविकल्प
लयानपेक्षयाद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरवस्थानं तदा मृन्मयगजादिभानेपि मृद्भान
वत् द्वैतभानेपि अद्वैतं वस्तु भासते तदुक्तमभियुक्तैः दृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमक्षरं अलेप

कं सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्त ॐमिति निर्विकल्पकस्तु ज्ञातृज्ञानादिविकल्पलयापेक्षयाद्वितीयवस्तुनि तदाकाराकारिताया
श्चित्तवृत्तेरतितरामेकीभावेनावस्थानं तदा जलाकाराकारितलवणानवभासे जलमात्रप्रतिभासवत् अद्वितीयवस्त्वाकाराकारितचित्तवृ
त्त्यनवभासेनाद्वितीयं वस्तुमात्रमवभासते ततश्चास्य सुषुप्तेश्चाभेदशंका न भवति उभयत्र वृत्त्यभाने समानेपि तत्सद्भावासद्भावमात्रे
णानयोर्भेदोपपत्तेः अस्यांगानि यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधयः तत्र अहिंसासत्यास्तेयब्रह्मचर्याप
रिग्रहा यमाः शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः करचरणसंस्थानविशेषलक्षणानि पद्मकस्वस्तिकादीन्यासना
नि रेचकपूरककुंभकलक्षणाः प्राणनिग्रहोपायाः प्राणायामाः इंद्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं प्रत्याहारः अद्वितीयवस्तुन्यंतरिंद्रि
यधारणं धारणा तत्राद्वितीयवस्तुनि विच्छिद्य विच्छिद्यांतरिंद्रियवृत्तिप्रवाहो ध्यानं समाधिस्तूक्तः सविकल्पक एव अस्यांगिनो निर्वि
कल्पकस्य लयविक्षेपकषायरसास्वादलक्षणाश्चत्वारो विघ्नाः संभवंति लयस्तावदखंडवस्त्वनवलंबनेन चित्तवृत्तेर्निद्रा अखंडवस्त्व
नवलंबनेन चित्तवृत्तेरन्यावलंबनं विक्षेपः लयविक्षेपाभावेपि चित्तवृत्ते रागादिवासनया स्तब्धीभावादखंडवस्त्वनवलंबनं कषा
यः अखंडवस्त्ववलंबनेनापि चित्तवृत्तेः सविकल्पकानंदास्वादनं रसास्वादः समाध्यारंभसमये सविकल्पकानंदास्वादनं वा
अनेन विघ्नचतुष्टयेन विरहितं चित्तं निर्वातदीपवदचलं सत् अखंडचैतन्यमात्रं यदा तदा निर्विकल्पकः समाधिरित्युच्यते तदुक्तं ल
ये संबोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः सकषायं विजानीयात्समप्राप्तं न चालयेत् नास्वादयेद्रसं तत्र निःसंगः प्रज्ञया भवेत्

वे॰ सा॰ इति यथा दीपो निवातस्थो नेंगते सोपमा स्मृतेति च अथ जीवन्मुक्तलक्षणमुच्यते जीवन्मुक्तः स्वस्वरूपाखंडब्रह्मज्ञानेन तदज्ञानबा
धनद्वारा स्वस्वरूपाखंडब्रह्मणि साक्षात्कृते ज्ञानतत्कार्यसंचितकर्मसंशयविपर्ययादीनामपि बाधितत्वादखिलबंधरहितो ब्रह्मनिष्ठः
१० भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे इति श्रुतेः अयं व्युत्थानसमये मांसशोणित
मूत्रपुरीषादिभाजनेन शरीरेणांध्यमांद्यापटुत्वादिभाजनेनेंद्रियग्रामेणाशनापिपासाशोकमोहादिभाजनेनांतःकरणेन च
पूर्वपूर्ववासनया क्रियमाणानि कर्माणि भुज्यमानानि ज्ञानाविरुद्धारब्धफलानि च पश्यन्नपि बाधितत्वात्परमार्थतो न पश्यति
यथेंद्रजालमिति ज्ञानवांस्तदिंद्रजालं पश्यन्नपि परमार्थमिति न पश्यति सचक्षुरचक्षुरिव सकर्णोऽकर्ण इवेत्यादिश्रुतेः उक्तं
सुषुप्तिवज्जाग्रति यो न पश्यति द्वयं च पश्यन्नपि चाद्वयत्वतः तथापि कुर्वन्नपि निष्क्रियश्च यः स आत्मविन्नान्य इतीह निश्चयः
अस्य ज्ञानात्पूर्वं विद्यमानानामेवाहारविहारादीनामनुवृत्तिवच्छुभवासनानामेवानुवृत्तिर्भवति शुभाशुभयोरौदासीन्यं वा त
दुक्तं बुद्धाद्वैतसतत्त्वस्य यथेष्टाचरणं यदि शुनां तत्त्वदृशां चैव को भेदोऽशुचिभक्षणे इति ब्रह्मवित्त्वं तथा मुक्त्वा स आत्मज्ञो २०
मा नचेतरः इति तदानीममानित्वादीनि साधनान्यद्वेष्टृत्वादयः सद्गुणाश्चालंकारवदनुवर्तन्ते तदुक्तं उत्पन्नात्मावबोधस्य ह्यद्वेष्टृत्वा
दयो गुणाः अयत्नतो भवंत्यस्य न तु साधनरूपिण इति किंबहुनायं देहयात्रामात्रार्थमिच्छानिच्छापरेच्छाप्रापितानि सुखदुःखलक्ष
णान्यारब्धफलान्यनुभवन्नंतःकरणाभासादीनामवभासकः संस्तदवसाने प्रत्यगानंदपरब्रह्मणि प्राणे लीने सति अज्ञान

तत्कार्यसंस्काराणामपि विनाशात्परमकैवल्यमानंदैकरसमखिलभेदप्रतिभासरहितमखंडं ब्रह्मावतिष्ठते न तस्य प्राणा उ
श्री त्क्रामंति अत्रैव समवलीयंते विमुक्तश्च विमुच्यते इत्यादिश्रुतेः इति श्रीमत्परमहंसपरिव्राजकाचार्यसदानंदेन कृ
तो वेदांतसारः समाप्तः सच्चिदानंदार्पितोऽस्त्वयम् विजयाषाढषष्ठ्यां तु नृपबाणांकयुक्शके वेदांतसारम
लिखद्घनश्यामो मधुव्रती १